(1056) " पॄ पालनपूरणयोः " (IX-क्र्यादिः-1489. सक. सेट्. पर.)

प्वादिः, ल्वादिश्च ।

'पृणाति पूरणे, श्लौ तु पिपर्ति, णिचि पारयेत् ॥' (श्लो. 36) इति देवः ।
पारकः-रिका, पारकः-रिका, पुपूर्षकः-र्षिका, पिपरीषकः-पिपरिषकः-षिका, पोपुरकः-रिका ; [1]पारयः[A], [2]पृणन्-ती, इत्यादीनि सर्वाण्यपि रूपाणि जौहोत्यादिकपिपर्तिवत् (1055) ज्ञेयानि । [3]पूर्तम्[B]-पूर्तः-पूर्तवान् ।

(1057) " पॄ पूरणे " (X-चुरादिः-1548. सक. सेट्. उभ.)

'पृणाति पूरणे, श्लौ तु पिपर्ति, णिचि पारयेत् ॥' (श्लो. 36) इति देवः ।
पारकः-रिका, पिपारयिषकः-षिका, पारकः-रिका, पुपूर्षकः-र्षिका, पिपरीषकः-पिपरिषकः-षिका, पोपुरकः-रिका ;
इत्यादीनि सर्वाण्यपि रूपाणि ण्यन्तात्, ण्यन्तप्रकृतिकसन्नन्तात् शुद्धात् तदुपरि सन्नन्तात् यङन्ताच्च यथायथं जौहोत्यादिकपृधातुवत् (1052) बोध्यानि । ण्यन्तात् सनि—पिपारयिषिता-त्री, पिपारयिषन्-न्ती, पिपारयिषिष्यन्-न्ती-ती; पिपारयिषमाणः, पिपारयिषिष्यमाणः, पिपारयिट्-यिषौ-यिषः, पिपारयिषितम्-तः-तवान्, पिपारयिषुः, पिपारयिषितव्यम्, पिपारयिषणीयम्, पिपारयिष्यम्, ईषत्पिपारयिषः-दुष्पिपारयिषः-सुपिपारयिषः, पिपारयिष्यमाणः, पिपारयिषः, पिपारयिषितुम्, पिपारयिषा, पिपारयिषणम्, पिपारयिषित्वा, प्रपिपारयिष्य, पिपारयिषम् २-पिपारयिषित्वा २, इतीमानि रूपाणीति विशेषः । णिजभावपक्षे शुद्धात् शतरि-परन्-न्ती, परिष्यन्-न्ती-ती इति रूपाणीति विशेषः ।

---

1. 'अनुपसर्गाल्लिम्पविन्दधारिपारि—' (3-1-138) इति ण्यन्तादस्मात् कर्तरि शप्रत्यये, शपि, पररूपे, णेरयादेशे च रूपम् ।
2. शतरि, 'क्र्यादिभ्यः—(3-1-81) इति श्ना विकरणप्रत्ययः । 'प्वादीनां ह्रस्वः' (7-3-80) इति शिति परे ह्रस्वः । 'ऋवर्णान्नस्य णत्वं वाच्यम्' (वा. 8-4-1) इति णत्वम् ।
3. 'न ध्याख्यापॄमूर्छिमदाम्' (8-2-57) इति निष्ठानत्वनिषेधः ।

A. 'धारयैः कुसुमोर्मीणां पारयैः बाधितुं जनान् ।' भ. का. 6. 79.

B. 'नागं ददर्श पटबूर्णमुखं धुनानं
कर्णौ भ्रमन्तमखिलान् अभिपूर्तरोषम् ॥' धा. का. 3.6.